तस्याशुद्धस्य दोषमाह ।
"वङ्गो विधत्ते खलु शुद्धिहीन-
स्तथा ह्यपक्वश्च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं
पाण्डुं प्रमेहञ्च भगन्दरञ्च ॥
विषोपमं रक्तविकारवृन्दं
क्षयञ्च हृच्छ्राणि कफज्वरञ्च ।
मेहाश्मरीविद्रधिमुख्यरोगान्
नागोऽपि कुर्य्यात् कथितान् विकारान् ॥"
तस्य शोधनमभिधीयते ।
"वङ्गनागौ प्रतप्तौ च गलितौ तौ निषिञ्चयेत् ।
त्रिधा त्रिधा विशुद्धिः स्यान्नविदुग्धेऽपि च
त्रिधा ।
तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा
त्रिधा । ततोऽर्कदुग्धे त्रिधा ॥ * ॥
अथ वङ्गस्य मारणविधिः ।
"मृत्पात्रे द्राविते वङ्गे चिञ्चाश्वत्थत्वचो रजः ।
क्षिप्त्वा वङ्गचतुर्थांशमयोदर्व्व्या प्रचालयेत् ॥"
चिञ्चा अम्लिली । रजश्चूर्णम् । अयोदर्व्वी कर-
च्छुली ।
"ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते ।
अथ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्द्दयेत् ॥
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ।
तालेन दशमांशेन याममेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥"
एवं मारितस्य वङ्गस्य गुणाः ।
"वङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रमीन् ।
निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् ॥
सिंहो गजौघन्तु यथा निहन्ति
तथैव रङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥'
इति भावप्रकाशः ॥
( यथाच ।
"वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदः श्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे
जारणमारणाधिकारे ॥ )
रङ्गः, पुं, (रन्ज् + घञ् ।) रागः । ( यथा, महा-
भारते । ५ । ३६ । १० ।
"वासो यथा रङ्गवशं प्रयाति
तथा स तेषां वशमभ्युपैति ॥" )
नृत्यम् । ( यथा विष्णुपुराणे । २ । ६ । २० ।
"रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा ।
रूपीमाहिषिकश्चैव पर्व्वकारी च यो द्विजः ॥"
रजति आसज्यति मनोऽत्र । रन्ज् + अधि-
करणे घञ् । ) रणभूमिः । इति मेदिनी । गे,
२९ ॥ ( यथा, श्रीमद्भागवते । १० । ४३ । १७ ।
"वृष्णीनां परदेवतेति विदितो रङ्गं गतः
साग्रजः ॥" )
नाट्यस्थानम् । इति हेमचन्द्रः ॥ ( यथा,
मृच्छकटिकप्रकरणे । १ ।
"इयं रङ्गप्रवेशेन कलानाञ्चोपशिक्षया ।
वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥"
लक्षणया नाट्यस्थानस्थितो जनः । यथा, अभि-
ज्ञानशकुन्तले १ प्रस्तावनायाम् ।
"सूत्रधारः । आर्य्ये ! साधु गीतम् । अहो
रागापहृतचित्तवृत्तिरालिखित इव विभाति
सर्व्वतो रङ्गः । तदिदानीं कतमं प्रयोगमाश्रित्यै-
नमाराधयामः ॥" राजमार्गः । यथा, देवी-
भागवते । ७ । २२ । ३ ।
"अवतार्य्य तदा रङ्गे तां भार्य्यां नृपसत्तमः ॥")
टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥
रङ्गकाष्ठं, क्ली, ( रङ्गं रञ्जितं काष्ठमस्य । ) पत्त-
ङ्गम् । इति राजनिर्घण्टः ॥
रङ्गजं, क्ली, ( रङ्गात् जायते इति । जन् + डः । )
सिन्दूरम् । इति रत्नमाला ॥
रङ्गजीवकः, पुं, (रङ्गेण रञ्जनकार्य्येण जीवतीति ।
जीव् + ण्वुल् । ) चित्रकारः । इति शब्द-
रत्नावली ॥ नाट्यकारश्च ॥
रङ्गदः, पुं, ( रङ्गं द्यति छिनत्तीति । दो + कः । )
टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥
रङ्गदा, स्त्री, ( रङ्गद + टाप् । ) स्फटी । इति
राजनिर्घण्टः ॥ ( तथास्याः पर्य्यायः ।
"स्फटी च स्फटिका प्रोक्ता श्वेता शुभ्रा च रङ्गदा ।
रङ्गदृढ़ा रङ्गदा च दृढ़ा रङ्गापि कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रङ्गदायकं, क्ली, ( रङ्गस्य दायकम् । ) कङ्कुष्ठम् ।
इति राजनिर्घण्टः ॥
रङ्गदृढ़ा, स्त्री, ( रङ्गवत् दृढ़ा । ) स्फटी । इति
राजनिर्घण्टः ॥
रङ्गपत्री, स्त्री, (रङ्गं रङ्गार्थं पत्रमस्याः । ङीष् ।)
नीलीवृक्षः । इति राजनिर्घण्टः ॥
रङ्गपुष्पी, स्त्री, ( रङ्गं रञ्जितं पुष्पमस्याः । )
नीलीवृक्षः । इति राजनिर्घण्टः ॥
रङ्गबीजं, क्ली, ( रङ्गं बीजं उत्पत्तिकारणमस्य । )
रूप्यम् । इति शब्दरत्नावली ॥
रङ्गभूतिः, स्त्री, ( रङ्गस्य रागस्य गौरिम्नः भूतिः
शोभात्र । ) कोजागरपूर्णिमा । इति शब्द-
रत्नावली ॥
रङ्गभूमिः, स्त्री, (रङ्गस्य भूमिः ।) मल्लभूमिः । इति
शब्दरत्नावली ॥ (यथा, महाभारते।१।१३५।६।
"अवघुष्टे समाजे च तदर्थं वदतां वरः ।
रङ्गभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ॥"
रङ्गभूमिविवरणं यथा, अश्ववैद्यके ।७।११-१२।
"सान्द्रां सुकठिनाञ्चैव पाषाणोदकसंयुताम् ।
तृणकाष्ठसमायुक्तां रङ्गभूमिन्तु वर्ज्जयेत् ॥
समाञ्च विपुलाञ्चैव किञ्चित् पांशुसमन्विताम् ।
एकान्ते विजने रम्ये रङ्गभूमिन्तु कारयेत् ॥")
नाट्यभूमिश्च ॥
रङ्गमल्ली, स्त्री, (रङ्गाय रागाय मल्ली ।) वीणा ।
इति शब्दरत्नावली ॥
रङ्गमाणिक्यं, क्ली, ( रङ्गं रञ्जितं माणिक्यम् । )
माणिक्यरत्नम् । इति राजनिर्घण्टः ॥
रङ्गमाता, [ ऋ ] स्त्री, (रङ्गस्य माता जनिका ।)
कुट्टनी । लाक्षा । इति मेदिनी । ते, २१५ ॥
रङ्गमातृका, स्त्री, (रङ्गमातृ + स्वार्थे कन् । टाप् ।)
लाक्षा । इति त्रिकाण्डशेषः ॥
रङ्गलासिनी, स्त्री, ( रङ्गेण रागेण लसितुं शील-
मस्याः इति । लस + णिनिः । ) शेफालिका ।
इति शब्दचन्द्रिका ॥
रङ्गशाला, स्त्री, ( रङ्गस्य शाला । ) नाट्यगृहम् ।
इति शब्दरत्नावली ॥ नाचघर इति भाषा ॥
रङ्गाङ्गा, स्त्री, (रङ्गं रङ्गार्हमङ्गमस्याः ।) स्फटी ।
इति राजनिर्घण्टः ॥
रङ्गाजीवः, पुं, ( रङ्गो हरितालादिस्तेनाजीव-
तीति । जीव् + अण् ! यद्वा, रङ्ग आजी-
वोऽस्य ।) चित्रकरः । इत्यमरः । २ । १० । ७ ॥
नटः । इति हेमचन्द्रः । ३ । ५८५ ॥
रङ्गावतारकः, पुं, ( रङ्गे सङ्गीतभवने अवतर-
तीति । तृ + ण्वुल् । यद्वा रङ्गं नृत्यादिकमव-
तारयतीति । तृ + णिच् + ण्वुल् । ) रङ्गाव-
तारी । तत्पर्य्यायः । शैलूषः २ भरतः ३ सर्व्व-
वेशी ४ भरतपुत्रकः ५ धात्रीपुत्रः ६ रङ्ग-
जीवः ७ जायाजीवः ८ नटः ९ कृशाश्वी १०
शैलाली ११ । इति हेमचन्द्रः ॥ नृत्यगीतस्थाने
गीतवाद्यादिना तदनुगुणतया प्रसक्तः । इति
प्रायश्चित्तविवेकः ॥ नटगायनव्यतिरिक्तरङ्गाव-
तरणजीवी । इति कुल्लूकभट्टः ॥ तस्यान्नभक्षण-
प्रायश्चित्तं यथा,—
"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन ।
केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः ॥"
इत्युपक्रम्य,—
"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च ।
सुवर्णकर्त्तुर्व्वेणस्य शस्त्रविक्रयिणस्तथा ॥"
इत्याद्युक्त्वा,—
"य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः ॥
तेषान्त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥
भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च ॥"
इति मानवे ४ अध्यायः ॥
रङ्गावतारी, [ न् ] पुं, ( रङ्गमवतरतीति । तृ +
णिनिः । ) नटः । इति जटाधरः ॥ ( यथा,
याज्ञवल्क्यसंहितायाम् । २ । ७२ ।
"स्त्रीवृद्धबालकितवमत्तोन्मत्ताभिशस्तकः ।
रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः ॥" )
रङ्गारिः, पुं, ( रङ्गस्य तदाख्यधातोररिरिव । )
करवीरः । इति रत्नमाला ॥
रङ्गिणी, स्त्री, ( रङ्गोऽस्त्यस्या इति । रङ्ग +
इनिः । स्त्रियां ङीप् । ) शतमूली । इति
जटाधरः ॥ कैवर्त्तिका । इति राजनिर्घण्टः ॥
रङ्गविशिष्टे, त्रि ॥
रंहः, [ स् ] क्ली, ( रंह्यते प्राप्यते इति । रहि
+ "अविरहिभ्यामसुन् ।" इति असुन् । इत्यु-
ज्ज्वलदत्तः । ४ । २१३ । ) रंहः । वेगः । इति
भरतद्विरूपकोषः ॥ ( यथा, सूर्य्यशतके । ७१ ।